# सिद्धान्तकौमुदी - ४

Program in which it is offered: [Integrated Masters – Vyākaraṇa]

**Course Category: [Core]**

Course Code – VK 116

**Course Credit Structure: [4]**

- **Lecture: [4]**
- **Tutorial: [none]**
- **Practical: [none]**

**Contact Hours per week: [4]**

## 1. Introduction

व्याकरणशास्त्रस्य प्रतिपाद्येषु अंशेषु शब्दसिद्धिप्रक्रिया प्रधानभूता वर्तते । एकस्य शब्दस्य सिद्धौ अष्टाध्याय्याः विभिन्नेभ्यः प्रदेशेभ्यः सूत्राणि आदाय तेषु तेषु प्रसङ्गेषु कार्याणि करणीयानि भवन्ति । सैषा दुर्गमा विविधशब्दसिद्धिप्रक्रिया वैयाकरणप्रवरेण भट्टोजिदीक्षितेन सिद्धान्तकौमुद्याख्ये ग्रन्थे सुगमतया बोधिता । अपि च बहुषु प्रदेशेषु सूत्रवार्तिकभाष्याणां मतेषु भेदे दृश्यमाने यथोचितं सर्वमतानुकूलः अन्यतममतानुकूलो वा पन्थाः अनुसरणीयो भवति यः अल्पमतिभिः ग्रहीतुं न शक्यते । भट्टोजिदीक्षितेन तादृशानि स्थलानि न्यक्षेण परिशील्य सिद्धान्तभूतः अर्थः स्वग्रन्थेऽस्मिन् प्रकाशितः । तस्मात् वैयाकरणप्रक्रियया साधुशब्दस्वरूपस्य निर्णये अयं ग्रन्थः नितरामुपकारकः वरीवर्ति ।

अत्र तद्धितप्रकरणं द्विरुक्तप्रकरणं चेति प्रकरणद्वयम् अध्याप्यते । तत्र उपकारकाणां व्याख्याभागानामपि यथोचितं बोधनं भविष्यति ।

## 2. Course Objectives

अनेन क्रमेण अध्ययनस्य अन्ते छात्राः –

- अपत्यादिष्वर्थेषु तद्धितान्तरूपाणि शास्त्रानुसारं साधयितुं शक्नुयुः

- शास्त्रानुसारं पदद्विर्वचनम् अवगच्छेयुः
- अनुवृत्त्यादिज्ञानपूर्वकं सूत्रार्थावगमे तद्व्याख्याने च पाटवं प्राप्नुयुः
- प्रकृतग्रन्थभागं प्रतिपङ्क्ति अधीत्य कस्यापि भागस्य व्याख्याने समर्थाः भवेयुः

## 3. Pre-requisites

- प्रकृतग्रन्थभागोपयोगिन्याः अष्टाध्याय्याः धारणा
- इतः पूर्वतनस्य ग्रन्थभागस्य सम्यक् अध्ययनम्
- सन्धिकार्याणां समासानां च ज्ञानम्

## 4. Readings

- सिद्धान्तकौमुदी, मोतिलाल बनरसीदास, भागः - १ & 2

## 5. Module-wise topics

The suggested structure is as follows:

**Module 1 – अपत्याधिकारः** 14 sessions

**Objectives –**

- अनन्तरादिषु अपत्येषु अर्थेषु तेभ्यः तेभ्यः प्रातिपदिकेभ्यः विहितानां तद्धितानां परिचयः
- तद्धितान्तरूपाणां निष्पादनम्
- प्रकरणान्तर्गतानां सूत्राणामर्थस्य अवबोधः
- एतस्मिन् विभागे विद्यमानां सूत्राणां सुष्ठु व्याख्याने सामर्थ्यम्

**Topics –**

- अनन्तरापत्ये प्रत्ययाः
- गोत्रापत्ये प्रत्ययाः
- युवापत्ये प्रत्ययाः

**Module 2 – चातुरर्थिकाः शैषिकाः च** 16 sessions

**Objectives –**

- रक्तादिष्वर्थेषु प्रत्ययानां यथयथं विधानम्

- शैषिकेष्वर्थेषु प्रत्ययानां परिचयः
- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- ग्रन्थगतानां विषयाणां निरूपणे सामर्थ्यावाप्तिः

**Topics –**

- रक्तादयोर्थाः, तदस्मिन्नस्तीति देशे तन्नाम्नि इत्यादयः चत्वारोऽर्थाः
- शैषिकाः घादयः प्रत्ययाः

**Module 3 – प्राग्दीव्यतीयाः प्राग्वहतीयाः प्राग्घितीयाः छयतौ च** 10 sessions

**Objectives –**

- प्राग्दीव्येषु , प्राग्वहतीयेषु , प्राग्घितीयेषु प्राक्क्रीतीयेषु च अर्थेषु प्रत्ययानां तदन्तरूपाणां च बोधः
- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः

**Topics –**

- प्राग्दीव्यतीयेषु अणादयः
- प्राग्वहतीयेषु ठगादयः
- प्राग्घितीयेषु यदादयः
- प्राक्क्रीतीयेषु च्छादयः

**Module 4 – आर्हीयप्रकरणं, कालाधिकारप्रकरणं, ठञ्-विधिप्रकरणं च** 10 sessions

**Objectives –**

- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- एतद्भागान्तर्गतानां सूत्राणां विवरणे सामर्थ्यम्

**Topics –**

- आर्हीयाः ठगादयः

- कालाधिकारः
- ठञ्विधिश्च

**Module 5 – भावकर्मार्थाः, पाञ्चमिकाः, मत्वर्थीयाः, प्रागिवीयाः, स्वार्थिकाश्च तद्धिताः** 7 sessions

**Objectives –**

- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- यथायथमर्थेषु तद्धितप्रत्ययानां तदन्तरूपाणां च निष्पादनम्
- एतद्भागान्तर्गतानां सूत्राणां विवरणे सामर्थ्यम्

**Topics –**

- त्वतलादयः, खञादयः, मतुबादयः, कादयः कबादयश्च

**Module 6 – द्विरुक्तप्रकरणम्** 3 sessions

**Objectives –**

- पदद्विर्वचनस्य यथयथमवबोधः
- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- एतद्भागान्तर्गतानां सूत्राणां विवरणे सामर्थ्यम्

**Topics –**

- नित्यादिष्वर्थेषु द्वित्वम्
- समासवद्भावः

## 6. Pedagogy

अध्यापनपद्धतिः प्रायेण उपन्यासरूपा अभ्यासरूपा च भवति । अयं विषयः प्रक्रियाबहुलः इति कारणतः लेखनफलकस्य अधिकतया उपयोगः करिष्यते । ग्रन्थाध्ययनावसरे अपेक्षितानां भागानां व्याख्यानमपि बोधयिष्यते ।

## 7. Learning Outcome

एतं ग्रन्थभागमधीतवन्तः छात्राः अत्रत्यानां सर्वेषां सूत्राणामर्थं, तल्लाभप्रकारं च सम्यक् ज्ञात्वा तैः लक्ष्यसंस्कारं च कृत्वा तद्धितान्तरूपाणां निष्पादने समर्थाः भविष्यन्ति । सूत्राणामर्थस्य, प्रक्रियायाः ग्रन्थस्थानां शास्त्रीयविचाराणां च मौखिकनिरूपणे समर्थाः भविष्यन्ति ।

## 8. Evaluation Pattern

- कार्यसमर्पणम् — २० अङ्काः
- प्रस्तुतिः — १५ अङ्काः
- सत्रार्धपरीक्षा — २५ अङ्काः
- सत्रान्तपरिक्षा — ४० अङ्काः